MS – 047

**Fourth Semester B.A./B.Sc./B.Com. Examination, May 2011**
**(2006-07 Batch) (Repeaters Scheme)**
**LANGUAGE SANSKRIT (Paper – IV)**
**Champu Ramayanam (Balakanda), Champu Literature Comprehension**

Time : 3 Hours Max. Marks : 90

***Instructions :*** *1) Answer in* ***Sanskrit/Kannada/English.***
*2) Question No. 7 should be answered in* ***Sanskrit*** *only.*

I. अ) चम्पूकाव्य लक्षणं विलिख्य प्रसिद्धकृतीनां नामानि कविनामानि च निर्दिशत । **10**

**अथवा**

भोजराजस्य देशकाल जीवितान्यधिकृत्य प्रबन्धं लिखत ।

आ) **द्वयोः** लघुटिप्पणीं लिखत ।

1) हरिचन्द्रः ।

2) चम्पू भारत ।

3) वेंकटाध्र्वशि ।

4) नीलकण्ठविजय चम्पू ।

II. **चतुर्णां** श्लोकानामनुवादं कृत्व भावं विवृणुत । **(5×4=20)**

1) वाचं निशम्य भगवान् स तु नारदस्य
प्राचेतसः प्रवचसां प्रथमः कवीनाम् ।
माध्यंदिनाय नियमाय महर्षिसेव्यां
पुण्यामवाप तमसां तमसां निहत्रीम् ।।

2) मा निषाद । प्रतिष्ठां त्वमगमः शाश्वती समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ।।

P.T.O.

3) प्रह्लादस्य व्यसनममितं दैत्यवर्गस्य दम्भं

स्तंम्भं वक्ष:स्थलमपि रिपोर्योगपद्येन भेत्तुम् ।

बद्ध श्रद्धं पुरुषवपुषामिश्रिते विश्वदृष्टे

दंष्ट्रारोचिर्विशदभुवने रंहसा सिंहवेषे ।।

4) कौसल्यायै प्रथममदिशद्भूपति: पायसार्धं

प्रादादर्धं प्रणयमधुरं केकयेन्द्रस्य पुत्र्यै ।।

एते देव्यौ तरलमनस: पत्युरालोच्य भांव

स्वार्धांशाभ्यां स्वयमकुरुतां पूर्णकामां सुमित्राम् ।।

5) बलेन तपसां लब्धे बलेत्यतिबलेति च ।

विद्येते मयि काकुह्थ ! विद्ये ते वितरामि ते ।।

6) त्रैविध्यं श्रूयतां वत्स ! सरितस्त्रिदिवौ कसाम् ।

यथोतां हव्यमधन्त्या देवताया इवाध्वरे ।।

III. 'सीताविवाह प्रसङ्गं' वर्णयत । **10**

**अथवा**

गङ्गावतरणं वर्णयत ।

IV. एकस्य परिच्छेदस्य अनुवादं कुरुत । **10**

अथास्मिन्ननपत्यतया द्वयमानमानसे पुत्रार्थे कर्तुं अश्वमेधं विधातुं मन्त्रिभि: समं मन्त्रायमाणे दशरथे सुमन्त्र पहृष्टमना महर्षेरङ्गदेशसंगतावग्रहनिग्रह शौण्डस्य विभण्डक सूनोरवश्यमृष्यश्रङ्गस्य प्रसादात्प्रभवो भविता कुमाराणामिति सनत्कुमारोदीरितं पुरावृत्तमस्मै दशरथाय कथयामास ।

**अथवा**

ततस्तानमरान्प्राह स्म पितामह: । भवन्तस्तावदवतरिष्यतो लक्ष्मीसहायस्य साहायार्थमप्सर: प्रभृतिषु युवतिषु वानराच्छभल्लगोपुच्छनील मुखवेषभृत: प्रथितप्रभावा: प्रजा: प्रजनयेयुरिति । पुरैवे किल मम जृम्भारम्भे संभूतवाञ्जाम्बवानिति । ततस्ते गीर्वाणास्तयाकुर्वन् ।

V. **द्वयो:** वाक्ययो: ससन्दर्भं विवृणुत । **10**

1) अजीजनत्कन्यारत्नं रत्नगर्भा भगवती ।

2) लोकानन्दमुकुन्दस्य चत्वार इव बाहव: ।

3) स्वप्राणान् रामबाणस्य वीरपाणमकल्पयत् ।

4) रामस्य पादरजसा प्रकृतिं प्रपेदे ।

VI. **द्वयो:** लघुटिप्पणीं लिखत । **10**

1) विष्णुवर्णनम् ।

2) त्रिशङ्कुप्रसङ्ग: ।

3) अहल्या शापविमोचनम् ।

4) याग सरंक्षणम् ।

VII. परिच्छेदं पठित्वा प्रश्नानां उत्तराणि लिखत । **10**

हासन मण्डेल 'बेलूरु' इति स्थाने चेन्नकेशवस्वामिन: महान् आलय: वर्तते । विष्णुवर्धनो नाम राजा द्वादश शतके एतदायतनं निर्ममे । शिलाभित्तौ रामायणस्य महाभारतस्य च कथा उत्कीर्णा: । आलयस्य परित: शिल्पा: प्रतिष्ठापिता: । अस्य आलयस्य चारुता वर्णयितुं अशक्या । डा. डी. वी. गुण्डप्प इति कविवरेण्य: अस्य आलयस्य शिल्पकलासौन्दर्यं वर्णायितुं 'अन्त: पुरगीतेगळु' इति काव्यं कन्नडभाषायां रचितवान् ।

**प्रश्ना :**

1) चेन्नकेशवस्वामिन: आलय: कुत्र अस्ति ?

2) चेन्नकेशवस्वामिन: आलय: कदा निर्मितम् ?

3) शिलायित्तौ का: कथा: उत्कीर्णा: ?

4) आलयं परित: के प्रतिष्ठापिता: ?

5) 'अन्त: पुरगीतेगळु' इति काव्य क: रचितवान् ? **10**

**अथवा**

एतेषु **एकमधिकृत्य** संस्कृतभाषया प्रबन्धं लिखत ।

1) परिसर मालिन्यम् ।

2) क्रिकेट क्रीडा ।

3) संस्कृत भाषा ।